# shrImahAlakShmI kavacham

# શ્રીમહાલક્ષ્મીકવચમ્

## Document Information

Text title : indra rachita mahAlakShmI kavacha

File name : indramahaalaxmiikavach.itx

Category : kavacha, devii, lakShmI, vyAsa, devI

Location : doc_devii

Author : Indra

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : June 13, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# shrImahAlakShmI kavacham

# શ્રીમહાલક્ષ્મીકવચમ્

શ્રી ગણેશાય નમઃ ।
અસ્ય શ્રીમહાલક્ષ્મીકવચમન્ત્રસ્ય બ્રહ્મા ઋષિઃ ગાયત્રી છન્દઃ
મહાલક્ષ્મીર્દેવતા મહાલક્ષ્મીપ્રીત્યર્થં જપે વિનિયોગઃ ।
ઇન્દ્ર ઉવાચ । સમસ્તકવચાનાં તુ તેજસ્વિ કવચોત્તમમ્ ।
આત્મરક્ષણમારોગ્યં સત્યં ત્વં બ્રૂહિ ગીષ્પતે ॥ ૧॥

શ્રીગુરુરુવાચ । મહાલક્ષ્મ્યાસ્તુ કવચં પ્રવક્ષ્યામિ સમાસતઃ ।
ચતુર્દશસુ લોકેષુ રહસ્યં બ્રહ્મણોદિતમ્ ॥ ૨॥

બ્રહ્મોવાચ । શિરો મે વિષ્ણુપત્ની ચ લલાટમમૃતોદ્ભવા ।
ચક્ષુષી સુવિશાલાક્ષી શ્રવણે સાગરામ્બુજા ॥ ૩॥

ઘ્રાણં પાતુ વરારોહા જિહ્વામામ્નાયરૂપિણી ।
મુખં પાતુ મહાલક્ષ્મીઃ કણ્ઠં વૈકુણ્ઠવાસિની ॥ ૪॥

સ્કન્ધૌ મે જાનકી પાતુ ભુજૌ ભાર્ગવનન્દિની ।
બાહૂ દ્વૌ દ્રવિણી પાતુ કરૌ હરિવરાઙ્ગના ॥ ૫॥

વક્ષઃ પાતુ ચ શ્રીર્દેવી હૃદયં હરિસુન્દરી ।
કુક્ષિં ચ વૈષ્ણવી પાતુ નાભિં ભુવનમાતૃકા ॥ ૬॥

કટિં ચ પાતુ વારાહી સક્થિની દેવદેવતા ।
ઊરૂ નારાયણી પાતુ જાનુની ચન્દ્રસોદરી ॥ ૭॥

ઇન્દિરા પાતુ જંઘે મે પાદૌ ભક્તનમસ્કૃતા ।
નખાન્ તેજસ્વિની પાતુ સર્વાઙ્ગં કરૂણામયી ॥ ૮॥

બ્રહ્મણા લોકરક્ષાર્થં નિર્મિતં કવચં શ્રિયઃ ।
યે પઠન્તિ મહાત્માનસ્તે ચ ધન્યા જગત્રયે ॥ ૯॥

કવચેનાવૃતાઙ્ગનાં જનાનાં જયદા સદા ।

માતેવ સર્વસુખદા ભવ ત્વમમરેશ્વરી ॥ ૧૦॥

ભૂયઃ સિદ્ધિમવાપ્નોતિ પૂર્વોક્તં બ્રહ્મણા સ્વયમ્ ।
લક્ષ્મીર્હરિપ્રિયા પદ્મા એતન્નામત્રયં સ્મરન્ ॥ ૧૧॥

નામત્રયમિદં જપ્ત્વા સ યાતિ પરમાં શ્રિયમ્ ।
યઃ પઠેત્સ ચ ધર્માત્મા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૨॥

॥ ઇતિ શ્રીબ્રહ્મપુરાણે ઇન્દ્રોપદિષ્ટં મહાલક્ષ્મીકવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*shrImahAlakShmI kavacham*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*